শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে পঞ্চদশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে পঞ্চদশং দশকম্॥

## কপিলোপদেশম্

মতিরিহ গুণসক্তা বন্ধকৃত্তেষ্ৱসক্তা
ৎৱমৃতকৃদুপরুন্ধে ভক্তিযোগস্তু সক্তিম্।
মহদনুগমলভ্যা ভক্তিরেৱাত্র সাধ্যা
কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ॥ **15.1** ॥

প্রকৃতিমহদহঙ্কারাশ্চ মাত্রাশ্চ ভূতা -
ন্যপি হৃদপি দশাক্ষী পূরুষঃ পঞ্চৱিংশঃ।
ইতি ৱিদিতৱিভাগো মুচ্যতেঽসৌ প্রকৃত্যা
কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ॥ **15.2** ॥

প্রকৃতিগতগুণৌঘৈর্নাজ্যতে পূরুষোঽযং
যদি তু সজতি তস্যাং তদ্গুণাস্তং ভজেরন্।
মদনুভজনতত্ত্বালোচনৈঃ সাঽপ্যপেযাৎ
কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ॥ **15.3** ॥

ৱিমলমতিরুপাত্তৈরাসনাদ্যৈর্মদঙ্গং
গরুডসমধিরূঢং দিৱ্যভূষাযুধাঙ্কম্।
রুচিতুলিততমালং শীলযেতানুৱেলং
কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ॥ **15.4** ॥

মম গুণগণলীলাকর্ণনৈঃ কীর্তনাদ্যৈঃ
মযি সুরসরিদোঘপ্রখ্যচিত্তানুৱৃত্তিঃ।

ভৱতি পরমভক্তিঃ সা হি মৃত্যোর্ৱিজেত্রী
 কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ ॥ **15.5** ॥

অহহ বহুলহিংসাসঞ্চিতার্থৈঃ কুটুম্বং
 প্রতিদিনমনুপুষ্ণন্ স্ত্রীজিতো বাললালী।
ৱিশতি হি গৃহসক্তো যাতনাং ময্যভক্তঃ
 কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ ॥ **15.6** ॥

যুৱতিজঠরখিন্নো জাতবোধোঽপ্যকাণ্ডে
 প্রসৱগলিতবোধঃ পীডযোল্লঙ্ঘ্য বাল্যম্।
পুনরপি বত মুহ্যত্যেৱ তারুণ্যকালে
 কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ ॥ **15.7** ॥

পিতৃসুরগণযাজী ধার্মিকো যো গৃহস্থঃ
 স চ নিপততি কালে দক্ষিণাধ্ৱোপগামী।
মযি নিহিতমকামং কর্মতূদকপথার্থং
 কপিলতনুরিতি ৎৱং দেৱহূত্যৈ ন্যগাদীঃ ॥ **15.8** ॥

ইতি সুৱিদিত ৱেদ্যাং দেৱ হে দেৱহূতিং
 কৃতনুতিমনুগৃহ্য ৎৱং গতো যোগিসঙ্ঘৈঃ।
ৱিমলমতিরথাঽসৌ ভক্তিযোগেন মুক্তা
 ৎৱমপি জনহিতার্থং ৱর্তসে প্রাগুদীচ্যাম্ ॥ **15.9** ॥

পরম কিমু বহূক্ত্যা ৎৱৎপদাম্ভোজভক্তিং
 সকলভযৱিনেত্রীং সর্ৱকামোপনেত্রীম্।
ৱদসি খলু দৃঢং ৎৱং তদ্ৱিধূযামযান্ মে
 গুরুপৱনপুরেশ ৎৱয্যুপাধৎস্ৱ ভক্তিম্ ॥ **15.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে পঞ্চদশং দশকং সমাপ্তম্ ॥